Shri Lakshminrisimha Prapatti

# श्रीलक्ष्मीनृसिंहप्रपत्तिः

## Document Information

Text title : lakShmInRRisiMhaprapattiH 1

File name : lakShmInRRisiMhaprapattiH.itx

Category : vishhnu, krishna, rAmAnujasampradAya, prapatti

Location : doc_vishhnu

Author : HH 44th paTTam MukkUr SrImad azhagiya singar

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

Shri Lakshminrisimha Prapatti

# श्रीलक्ष्मीनृसिंहप्रपत्तिः

श्री श्रीनिवासाह्वययोगिवर्यं नारायणं योगिवरं तथैव ।
श्रीयोगिवर्यं रघुवीरवेदकोटीरसंज्ञं गुरुमाश्रयामि ॥ १॥

अहोबिले गारुडशैलमध्ये कृपावशात्कल्पितसन्निधानम् ।
लक्ष्म्या समालिङ्गितवामभागं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ २॥

श्रीवण्शठारातियतीन्द्रमाद्यं प्रेम्णा स्वयम्प्रेषमनुप्रदाय । (श्रीमच्छठाराति)
स्वाराधने प्रेरयति स्म यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ३॥

सर्वस्य लोकस्य समीहितानां प्रदानदीक्षावशतः सदैव ।
श्रिया समेतं श्रितदोषहन्त्र्या लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ४॥

यस्याभवद्भक्तजनार्तिहन्तुः पितृत्वमन्वेष्वविचार्य तूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ५॥

यमीक्षितुं देवगणोऽतिरुष्टं शत्रौ न शक्नोति चतुर्मुखादिः ।
प्रसादितो भक्तजनेन यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ६॥

वामत्वमद्य त्यज संश्रितेषु नास्तीह कश्चित्किल नापराधी ।
लक्ष्म्येति वामाङ्कगयोच्यमानं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ७॥

श्रीवीरवद्राघववेदमौलिं योगीन्द्रक्लृप्तैश्शुभतापपुण्ड्रैः ।
नामादिभिर्मां युतमातनोद्यस्तं श्रीनृसिंहं शरणं प्रपद्ये ॥ ८॥

श्रीमद्रहस्यत्रयसारपाठप्रारम्भकाले तव सर्वसिद्धिः ।
स्यादित्युपश्रुत्यभिधायकं मे लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ९॥

भास्यप्रदानावसरे तु वीररघूद्वहाम्नायशिखार्यरूपी ।
स्वप्नागतो भाष्यमदत्त यो मे लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ १०॥

यः श्रीनिवासाख्यमुनीन्द्रतो मां सम्प्राप्तवेदान्तयुगं व्यतानीत् ।
तदर्पितं स्वीकृतमद्भरं तं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ ११॥

स्वप्ने रमावासमुनीन्द्ररूपी स्वयं समागत्य ममापि देवः ।
त्रिदण्डकाषायमदान्मुदा यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ १२॥

आराधनं स्वस्य कथं मयेति भीतं सदा पद्मलतामुखेन ।
आश्वास्य मामप्यकरोत्कृतार्थं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ १३॥

शठारिनारायणयोगिवर्यपराङ्कुशस्वामि पराङ्कुशाद्यैः ।
यः पूजितः श्रीनिधियोगिमुख्यैर्लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ १४॥

नारायणश्रीरघुवीरवेदकोटीरनारायणरमानिवासैः ।
योगीश्वरैरन्वहमर्चितो यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ १५॥

त्वद्दत्तवाचा तव किङ्करेण त्वत्प्रीतिकामेन मया कृतेन ।
स्तोत्रेण लक्ष्मीनृहरेः स विष्णुः प्रीतो भव त्वं करुणार्द्रदृष्टिः ॥ १६॥

पराङ्कुशाख्येन तपोधनेन लक्ष्मीनृसिंहस्य कृता प्रपत्तिः ।
पापठ्यते येन भवेत्स तस्य पूर्णं कृपापूर्णकटाक्षपात्रम् ॥ १७॥

इति श्रीमद्भिः श्रीवण्शठकोप श्रीवेदान्तदेशिकयतीन्द्र
महादेशिकैरनुगृहिता श्रीलक्ष्मीनृसिंहप्रपत्तिः समाप्ता ॥

Composed by HH 44th paTTam MukkUr SrImad azhagiya singar

Proofread by PSA Easwaran

*Shri Lakshminrisimha Prapatti*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*